# ॥ देवी नवरत्नमाला स्तोत्रम् ॥

ओंकारपञ्जरशुकीम् उपनिषदुद्यानकेलिकलकण्ठीम् ।
आगमविपिनमयूरीम्-आर्याम्-अन्तर्विभावये गौरीम् ॥ १ ॥

दयमान-दीर्घ-नयनां देशिकरूपेण दर्शिताभ्युदयाम् ।
वामकुचनिहितवीणां वरदां सङ्गीतमातृकां वन्दे ॥ २ ॥

श्यामतनुसौकुमार्यां सौन्दर्यानन्द-सम्पदुन्मेषाम् ।
तरुणिमकरुणापूरां मदजल-कल्लोल-लोचनां वन्दे ॥ ३ ॥

नखमुख-मुखरित-वीणानाद-रसास्वाद-नव-नवोल्लासम् ।
मुखमम्ब मोदयतु मां मुक्ताताटङ्क-मुग्धहसितं ते ॥ ४ ॥

सरिगमपधनिरतां तां वीणासङ्क्रान्त-कान्तहस्तां तां ।
शान्तां मृदुलस्वान्तां गुरुवरभूतां नमामि शिवकान्ताम् ॥ ५ ॥

अवटुतटघटित-चूली-ताडिततालिी-पलाश-ताटङ्काम् ।
वीणावादन-वेलाकम्पितशिरसं नमामि मातङ्गीम् ॥ ६ ॥

वीणारवानुषङ्गं विकचमदामोद-माधुरी-भङ्गम् ।
करूणापूर-तरङ्गं कलये मातङ्ग-कन्यकापाङ्गम् ॥ ७ ॥

मणिभङ्ग-मेचकाङ्गीं मातङ्गीं नौमि सिद्धमातङ्गीम् ।
यौवन-वन-सारङ्गीं सङ्गीताम्भोरुहानुभव-भृङ्गीम् ॥८॥

मेचकमासेचनकं मिथ्या-दृष्टान्त-मध्य-भागं ते।
मातः स्वरूपमनिशं मङ्गल-सङ्गीत-सौरभं वन्दे ॥९॥

नवरत्नमाल्यमेतद् रचितं मातङ्गकन्यकाभरणम् ।
यः पठति भक्तियुक्तः सः भवेत् वागीश्वरः साक्षात् ॥